# संस्कृत-वार्ता:

**दिनाङ्क:-05.04.2024** **सायम् - 06:20**

**aअनुवादकौ – निधिकृष्णौ**

**प्रवाचिका – निधि:**

**आशुलिपिक – कैलाशकुमार:**

**इयम् आकाशवाणी**

**सम्प्रति: वार्ता: श्रूयन्ताम्**

**प्रवाचिका – निधि:**

## आदौ-मुख्यवार्ता:

- भारतीय रिजर्व-बैंक इत्याख्येन राष्ट्रिय महाकोषेन रेपोदराख्ये प्रतिदानपरिमितौ सप्तमवारं अपरिवर्तित-स्थापयित्वा सार्धषट्प्रतिशतमेव कृतमस्ति। अस्मिन् वित्तवर्षे विकासपरिमिति: सप्तप्रतिशतम् सम्भाविता वर्तते।
- निर्वाचनायोगेन अद्य एकादश-राज्यानां नगर-निगमायुक्तै: जनपदस्तरीयै: निर्वाचनाधिकारिभि: सह उपवेशनं विहितम्, निर्दिष्टं च यत् मतकेन्द्र-स्तरीय-कार्य-योजनाया: सज्जता भवेदिति।
- राजस्थानस्य चुरूक्षेत्रे भाजपेति दलस्य प्रमुखनेत्रा प्रधानमन्त्रिणा च श्रीनरेन्द्रमोदिना नैर्वाचनिका सभा सम्बोधिता।
- कांग्रेसदलेन अद्य लोकसभा-निर्वाचनाय स्वकीय दलस्य घोषणापत्रं प्रख्यापितम्। यत्र उक्तमस्ति यत् त्रयोविंशतिकोटिजना: निर्धनताया: सीमात: उपरि नेष्यन्ते।
- **अपि च**
- आईपीएल् प्रतिस्पर्धायाम् अद्य हैदराबादनगरे सनराइजर्स हैदराबाद-चेन्नैसुपर-किंग्सदलयो: मध्ये क्रिकेट-प्रतिस्पर्धा भविष्यति।

# अथ वार्ता: विस्तरेण

## भारतीय-रिजर्व-बैंक

भारतीय रिजर्व-बैंक इत्याख्येन राष्ट्रिय महाकोषेन रेपोदराख्ये प्रतिदानपरिमितौ सप्तमवारं अपरिवर्तितं स्थापयित्वा सार्धषट्प्रतिशमेव कृतमस्ति। वित्तकोषस्यास्य प्रमुखेण शक्तिकान्तदासेन अद्य द्वैमासिक-मौद्रिक-नीति-विषयक-घोषणायाम् उक्तं यत् अस्मिन् सप्तप्रतिशतम् उपभोक्तृमूल्यसूचकाङ्कश्च मुद्रास्फीति: सार्धचतुर्प्रतिशते स्थगनस्य सम्भावना वर्तते। तेनोक्तं यत् मार्चमासस्य एकोनत्रिंशद्दिनांकं यावत् भारतस्य वैदेशिकमुद्रागार: सर्वोच्चतमे स्थाने अस्ति। आहत्य च भण्डारेऽस्मिन् सार्धषडाब्ज-प्राय: कोटिडालरात्मक: राशि: समाकलितोऽस्ति।

## निर्वाचनयोग:-समीक्षोपवेशनं

निर्वाचनायोगेन अद्य तेषां एकादश-राज्यानां नगर-निगमायुक्तै: जनपदस्तरीयै: निर्वाचनाधिकारिभि: सह उपवेशनं विहितम्। यत्र विगतेषु सामान्य-निर्वाचनेषु अतिन्यूनं मतदानं अभवत्। नवदिल्ल्यां मुख्य-निर्वाचनायुक्तेन राजीवकुमारेण सह निर्वाचनायुक्तयो: ज्ञानेशकुमार-सुखबीर-सिंह-सन्धू-इत्यनयो: अध्यक्षतायां उपवेशनमिदमासीत्। उपवेशनावधौ मुख्य-निर्वाचनायुक्तेन राजीवकुमारेण चयनित-जनपदानां नगर-निगमायुक्ता: जनपदस्तरीय-नैर्वाचनिकाधिकारिण: निर्दिष्टा: यत्ते मतदातृ-सहभागित्वं संवर्धयितुं व्यवहार-परिवर्तनाय च मतकेन्द्र-स्तरीय-कार्य-योजनाया: सज्जतां कुर्वन्तु। अनेन प्रख्यापितं यत् नगर-ग्राम-क्षेत्रेभ्य: बहुविध-रणनीतिक-सज्जताया: साधित-क्षेत्राणाञ्च अनुसारेण योजनानां निर्माणमपि भवेदिति। मुख्य-निर्वाचनायुक्तेन साधितपद्धत्या सह मतदातॄन् प्रापणाय अल्पप्रतिशत-मतदानयुतानां पञ्चदशाधिकद्विशतं ग्रामीण-निर्वाचनक्षेत्राणां एकपञ्चाशत्-नगरीय-संसदीय-निर्वाचननक्षेत्राणाञ्च अभिज्ञानं कृतम्। निर्वाचनायोगप्रमुख: अधिकारिण: प्रख्यापितवान् यत्ते अनया पद्धत्या कार्यं सम्पादयन्तु येन हि मतदातृषु निर्वाचनरूपी-लोकतान्त्रिक-उत्सवे भागग्रहणस्य गौरव: समुत्पन्नो भवेत्। एतदर्थं असौ त्रिस्तरीय प्रबन्धनानि आकारितवान् प्रथमं-मतदानकेन्द्रेषु स्थितमतदातॄणां कृते सौविध्यानि यथा पंक्तिप्रबन्धनम्। द्वितीयं प्रचारप्रसारत्वेन सम्पर्क सम्बन्धयो: स्थापनम्। तृतीयञ्च महत्वपूर्णानां हितधारकाणां समायोजन-पुरस्सरं जनसंचेतनायै सहभागिता च।

## द्वितीय-चरण-नामांकननिरीक्षणं

जम्मूकश्मीरं विहाय देशस्य अन्येभ्य: भागेभ्य: लोकसभा-निर्वाचनस्य द्वितीय-चरणस्य नामांकन-पत्राणां निरीक्षणम् अद्य समारभते। तत्रैव जम्मूकश्मीरे नामांकनपत्राणां निरीक्षणं श्वो भविष्यति। द्वितीयचरणाय नामांकनप्रक्रिया ह्य: समाप्ता जाता। द्वितीयचरणेऽस्मिन् बाह्य-मणिपुर-लोकसभा-निर्वाचन-क्षेत्रेण सह द्वादशराज्येषु केन्द्रशासितप्रदेशेष्वपि निर्वाचनं अस्य मासस्य षड्विंशतिदिनांके भविष्यति। जम्मूकश्मीरे समेत्य समेषां राज्याणां केन्द्रशासित प्रदेशानाञ्च प्रत्याशिनां सोमवासरं यावत् नामप्रत्यावर्तनं कर्तुं शक्यते।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

## प्रधानमन्त्री-राजस्थान

राजस्थानस्य चुरूक्षेत्रे भाजपेति दलस्य प्रमुखनेत्रा प्रधानमन्त्रिणा च श्रीनरेन्द्रमोदिना नैर्वाचनिका सभा सम्बोधिता। अस्मिन् नैर्वाचनिक-सम्मर्दे विभिन्नानां दलानां नेतार: सभा-पथसञ्चलनादीनां नेतृत्वं कुर्वन्त: सन्ति। अत्रावसरे प्रधानमन्त्रिणा मोदिना स्वस्य दलस्य लोकसभाप्रत्याशिनां समर्थनाय जना: आवाहिता: स उक्तवान् यत् आराष्ट्रं सम्प्रति देशस्य प्रगतौ कार्यं कुरुते, अभियानेऽस्मिन् स: राजस्थानस्य पुष्करतीर्थं क्षेत्रं याति यत्र स: नागौर-अजमेरयो: प्रत्याशिन्यो: प्रचारं विधास्यति।

## कर्णाटक-निर्वाचनसाक्षरता

कर्णाटकराज्ये निर्वाचन-साक्षरता-समिति: निर्वाचने सहभागितया सम्बद्ध-साक्षरताया: संवर्धनस्य प्रचारं कृतवती। सुव्यवस्थितमतदातृ-शिक्षा-निर्वाचकसहभागिता सम्बन्धितस्य **स्वीप** इत्याख्यास्य कार्यक्रमस्य उद्देश्यं निर्वाचनसहभागित्वं वर्तते। आकाशवाण्या सह विशिष्ट-संवादे स्वीप-प्रमुख-अधिकारी वी.एस्. वस्त्राद: सूचितवान् यत् राज्येऽस्मिन् पञ्चविंशति-सहस्र निर्वाचन-साक्षरता-समितय: विभिन्न-प्रतिस्पर्धानां माध्यमेन युवान: प्रशिक्षिता: जाता:।

## त्रिपुरानिलम्बनम्

त्रिपुरायां निर्वाचनस्य आदर्श-आचार-संहिताया: उल्लंघनारोपे विशिष्ट-आरक्षि-अधिकारी अस्थायि रूपेण निलम्बित: जात:। राज्य-निर्वाचन-विभाग: प्रोदीरितवान् यत् असौ अधिकारी अष्टाविंशतिमार्चमासे जाते एकस्य राजनीतिकदलस्य कार्यक्रमे भागं गृहीतवानिति।

## कांग्रेसघोषणापत्रम्

कांग्रेसदलेन अद्य लोकसभा-निर्वाचनाय स्वकीय-दलस्य घोषणापत्रं प्रख्यापितम्। दलाध्यक्ष: मल्लिकार्जुन-खरगे: दलस्यास्य वरिष्ठनेतृभ्यां सोनियागांधी-राहुलगांधीभ्याञ्च सह अद्य नवदिल्ल्यां एतत् घोषणापत्रं प्रकाशितवान्। स्वीय-घोषणापत्रे कांग्रेसदलेन आधार-भूतसंरञ्चनानां विकासेन सह आगामि-दशके निर्धनतां दूरीकर्तुं च जना: आश्वासिता:। दलेनानेन केन्द्रप्रशासने विभिन्नस्तरेषु स्वीकृत-पदेषु प्रायश: त्रिंशल्लक्षं रिक्तस्थानानां प्रपूरणस्यापि वचनं प्रदत्तम्। अपि च प्रतिदिनं चतुश्शतं रुप्यकाणां राष्ट्रिय-न्यूनतम-श्रमिक-वृत्यवसरं प्रत्येकं निर्धनपरिवारेभ्य: प्रतिवर्षं एकलक्षरूप्यकाणि, केन्द्रप्रशासनस्य पदरिक्तस्थानेषु महिलाभ्य: पञ्चाशत्प्रतिशतं आसनानाम् आरक्षणम् इत्यादीनि वचनानि अस्मिन् घोषणापत्रे प्रकाशितानि।

## भाजपा-कांग्रेसघोषणापत्र विषये

लोकसभानिर्वाचनाय कांग्रेसदलद्वारा प्रसारिते घोषणापत्रविषये भाजपेतिदलेन प्रोक्तं यत् घोषणापत्रमिदं मिथ्यागार: अस्तीति। नवदिल्ल्यां वार्ताहरान् संसूचयन् दलप्रवक्त्रा सुधांशुत्रिवेदिना प्रोक्तं यत् घोषणापत्रमिदं मतदातॄन् भ्रामयितुं रचितमस्तीति, यतो हि कांग्रेसदलेन इत: पूर्वं रचितानि घोषणा-पत्रणि कदापि हि न पूरितानि। कांग्रेस-दलेन घोषणापत्रेऽस्मिन् न्यूयार्कनगरस्य बफेलोनद्या: चित्रं जलप्रबन्धनपृष्ठे संश्लेषितमस्ति। प्रवक्त्रा एतदपि प्रोक्तं यत् कांग्रेस-दलेन न्यायपत्रमाध्यमेन देशजनै: सह अन्यायो विहित: इति।

**भारर्तुविभाग:**

भारतर्तु-विज्ञान विभागेन देशस्य पूर्वीय-उपद्विपीय-क्षेत्रेषु अग्रिमं दिनद्वयं यावत् उष्णलहरी भविष्यनीति अनुमानितास्ति। उष्णलहर्य: कर्णाटकस्य उत्तरी क्षेत्रेषु ओडिशा-पश्चिम-बंगाल-झारखण्ड-तेलंगाना-आन्ध्रप्रदेश-पुडुच्चेरी-तेलंगाना-राज्येषु श्व: यावत् प्रवक्ष्यन्ति। रविवासरपर्यन्त देशस्य पूर्वोत्तरभागेषु वृष्ट्या: झञ्झावातस्य च अनुमानमस्ति। ऋतुविभागेन अरूणाचलप्रदेशे वृष्टि: हिमपातश्च अनुमानित: अपि च श्व: महतीवृष्टि: भविष्यति इति प्रोक्तम्। असम-मेघालयो: विविधभागेषु अतिवृष्टि: सम्भावितास्ति। सोमवासरं यावत् केरल-तमिलनाडु-कर्णाटक-गोआ-इत्यादिषु राज्येषु उष्णता तादवदेव भविता। तत्रैव राष्ट्रियरराजधान्यां ऋतु-विभागेन तीव्रवायुना सह अल्पवृष्टिरपि सम्भावितास्तीति उक्तम्।

**आईपीएल्**

आईपीएल् प्रतिस्पर्धायाम् अद्य हैदराबादनगरे सनराइजर्स हैदराबाद-चेन्नैसुपर-किंग्सदलयो: मध्ये क्रिकेट प्रतिस्पर्धा भविष्यति। अस्या: स्पर्धाया: प्रसारणम् अद्य सायम् सार्धसप्तवादने भविष्यति। ह्य: जातायां प्रतिस्पर्धायां पञ्जाब-किंग्सदलेन गुजरात-टाइटन्सदलं अहमदाबादनगरस्य नरेन्द्रमोदिक्रीडांगणे त्रिस्तोभै: पराजितम्।

**।। इति वार्ता: ।।**